संस्कृत - पत्रिका | पञ्चमसंकलनम् |जनवरीतः जूनपर्यन्तम् २०२२

CHINMAYA VIDYALAYA
KEEP SMILING
CHINMAYA MISSION



# चिन्मय निर्झरिणी

चिन्मयविद्यालयः, बोकारो, झारखण्डः

ॐ

# गुरोः ध्यानम्

अखण्डमण्डलाकारं

व्याप्तं येन चराचरम्।

तत्पदं दर्शितं येन,

तस्मै श्रीगुरवे नमः।।

अज्ञानतिमिरान्धस्य

ज्ञानाञ्जनशलाकया।

चक्षुरुन्मीलितं येन,

तस्मै श्रीगुरवे नमः।।



# सम्पादकीयः

सर्वेभ्यः सप्रेम हरिः ऊँ !

साहित्यम् समाजस्य दर्पणम् अस्ति। संस्कृताभिवृद्धिः यदि अपेक्ष्यते तर्हि संस्कृतक्षेत्रे अपि आधुनिकं सर्जनात्मकं साहित्यं अधिकतया सृष्टं भवेत् इति विषयं तु प्रायः अङ्गीकुर्वन्ति। एतया दृष्ट्या बहुविधाः प्रयत्नः सर्वत्र प्रचलन्तः सन्ति अपि। एतत् काले अस्माभिः एतदपि चिन्तनीयं यत् सृज्यमानं साहित्यं कालोचितम् अस्ति न वा।

वस्तुतः एषा पत्रिका सम्प्रति स्वबाल्यावस्थायामस्ति। अस्याः मुख्योद्देश्यः छात्राणां रचनात्मकप्रतिभानां सकारात्मकरुपप्रदानं, तेषाञ्च विचारसङ्गठनेन व्यक्तित्वपरिष्करणं वर्तते। अत्र विशुद्धा चिन्मयसंस्कृतिः अस्ति, भविष्यति च आगामिकाले। अत्र चिन्मय-दृष्टि-कार्यक्रमाः (cvp) विविधरुपेण रचनायां रुपाकृतिं गृह्णन्ति, ग्रहीष्यन्ति चैव। आशासे यत् एषा पत्रिका न केवलं छात्रहितानि साधयिष्यति, अपितु वृहद्पाठकवृन्दस्यापि हितसाधनाम् करष्यिति।

पत्रिकायाः सफलतायाः दायित्वं सुधी पाठकानां उपरि भवति। भवन्तः निश्चयेन पत्रिकायाः सम्यक् मूल्याङ्कनं कृत्वा विविधपक्षानां उपरि सम्पादकमण्डलस्य मार्गदर्शनं करिष्यन्ति। मम एषः विश्वासः यत् पत्रिकायाः विषयवस्तुः भवताम् कृते लाभप्रदं ज्ञानप्रदं च कल्याणकरं अपि भविष्यति।

अस्याः सम्वर्धनाय परिवर्धनाय वा मतिमताम् पाठकानाम् सद्विचाराः परामर्शः वा सादरमामन्त्रयन्ते।


संपादकमण्डलसदस्याः

शिक्षकमण्डली

श्री गोपाल कृष्ण दूबे

श्रीमती तिलोत्तमा कोचगवे

श्री शुभेंदु मिश्रा



प्रकाशकः - संस्कृतविभागः,चिन्मयविद्यालयः, बोकारो, झारखण्डः

# अनुक्रमणिका


| | | |
|---|---|---|
| गुरोः ध्यानम् | | |
| संपादकीयः | | |
| कथा | | 1-2 |
| पिपासितः काकः | | 2 |
| बालरचनाः | | 3-7 |
| मम ग्रामः | मिशिता 8G | 4 |
| भारतवर्षः | | 4 |
| समयस्य महत्वम् | आदित्यः 9E | 5 |
| अनुशासनम् | राहुलः 9E | 5 |
| मम विद्यालयः | गार्गी 9E | 6 |
| वृक्षारोपणं | लाइबा 9D | 6 |
| गजः | सुरभी 8G | 7 |
| होलिकोत्सवः | श्वेता झा 9D | 7 |
| बालकृतयः | | 8-11 |
| बालप्रमोदिनी | | 12-15 |
| शब्दज्ञानम् | | 13 |
| संस्कृत-अव्यय-शब्दाः | | 14 |
| संस्कृते विज्ञानम् | | 15 |
| चित्रावली | | 16-18 |
| सुभाषितम् शुभाशयाः च | | 19 |
| अग्रिमप्रत्याः मुखपृष्ठम् | | 20 |

# कथा

# पिपासितः काकः



एकदा एकः काकः अतिपिपासितः आसीत् । सः जलं पातुम् इतस्ततः अभ्रमत् । परं कुत्रापि जलं न प्राप्नोत् ।



अन्ते सः एकं घटम् अपश्यत् । घटे स्वल्पं जलम् आसीत् । अतः सः जलं पातुम् असमर्थः अभवत् । सः एकम् उपायम् अचिन्तयत् ।



सः पाषाणस्य खण्डानि घटे अक्षिपत् । एवं क्रमेण घटस्य जलं उपरि आगच्छत् ।



काकः जलं पीत्वा सन्तुष्टः अभवत् । परिश्रमेण एव कार्याणि सिध्यन्ति न मनोरथैः ।



# बालरचना:

## मम ग्रामः

भारतवर्षः ग्रामप्रधानः देशः अस्ति। 'भदवरः' इति मम ग्रामस्य नाम अस्ति। अयं राज्यः ' बिहार ' इति राज्ये स्थितः वर्तते। अत्र प्रायशः जनाः कृषिकार्यं कुर्वन्ति। मम ग्रामस्य जनाः उत्सवप्रियाः कर्मप्रियाः च सन्ति। ते स्नेहेन मिलित्वा निवसन्ति। परस्परं सहाय्यं अपि कुर्वन्ति। अधुना अत्र पाठशाला: चिकित्सालयः चापि सन्ति। ग्रामं परितः कृषकाणां क्षेत्राणि सन्ति। ग्रामस्य मध्ये एकः कालीमंदिरं अपि अस्ति। ग्रामपंचायतः ग्रामस्य विकासकार्याणि सर्वदा कुर्वन्ति। अत्रस्य पर्यावरणं शुद्धं वर्तते। जनाः अवकराणि इतस्ततः न क्षिपन्ति। अस्मिन् ग्रामे अनेके पशवः खगाः च भ्रमणं कुर्वन्ति। मम ग्रामः मह्यम् अतीव रोचते।

मिशिता, 8G





## भारतवर्षः

अस्माकं देशः भारतवर्षः अस्ति। अस्य देशस्य राष्ट्रभाषा हिन्दी अस्ति। भारतस्य राजधानी दिल्ली अस्ति। अत्र गङ्गा, यमुना, गोदावरी, ब्रह्मपुत्र प्रभृतयः नद्यः अमृततोयं वहन्ति। अत्र काशी, मथुरा, प्रयाग, पूरी प्रभृतयः तीर्थनगराणि अपि वर्तन्ते यत्रः जनाः अवकाशे भ्रमन्ति। अत्रैव रामः,कृष्णः, गौतमः च जाताः। अत्र अष्टाविंशतिः देशाः , नव केन्द्रशासितप्रदेशाः च सन्ति। 1947 तमे अयं राष्ट्रः स्वतंत्रः अभवत्। अयं हि हिमालयात् रामेश्वरपर्यन्तम्, पुरीतः द्वारकापर्यन्तम् प्रसृतः अस्ति। भारते प्रसिद्धाः उत्सवाः सन्ति - होली, दीपावली, गणेशचतुर्थी, दुर्गापूजा इत्यादि।

वन्दे मातरम्।

# समयस्य महत्त्वम्

जीवने समयस्य पालनम् अत्यावश्यकम् अस्ति। ये मानवाः समयस्यपालनं कुर्वन्ति, ते सर्वेषु क्षेत्रेषु सफलाः भवन्ति। अद्य यैपि जनाः प्रतिष्ठिताः वर्तन्ते ते जनाः समयस्य सदुपयोगं अकुर्वन्। वयं समयेन अस्माकं कार्याणि कुर्याम। समयः एव महाबलस्य, निर्बलस्य च मानुषस्य निर्माणं करोति। वयं समयसारिण्या कार्याणि कुर्याम। वयं समये भोजनं, शयनं च कुर्याम। वयं सदैव समयेन सह चलेम। इदम् सफलतायाः कुंजी अस्ति। छात्रेभ्यः तु समयस्य सदुपयोगेनैव उन्नतेः एकमात्रं साधनमस्ति। गतिशीलः समयः तु कदापि न पुनः आगच्छति इति कारणात् समयः अतिबहुमूल्यः अस्ति।अतएव वयं तस्य सदुपयोगं कुर्याम।



आदित्यः, 9E

# अनुशासनम्



मानवस्य जीवने अनुशासनस्य महती आवश्यकता भवति। अनेन विना मानवः पशुवत् भवति। समाजे अनुशासनेनैव जनाः माम् सम्मानं कुर्वन्ति। अस्योपरि मानवानां उन्नतिः निर्भरः। छात्राः अनुशासनेनैव विद्यां प्राप्तुं कर्तुं शक्यन्ते। अनुशासनयुक्तः विद्यार्थी अत्युत्तमः भवति। अतः बाल्यकालातेव अनुशासनस्य पालनं करणीयम्। सेनायाम् अपि अनुशासनस्य अत्यधिकं महत्वं भवति। विद्यालये अपि अनुशासनस्य पालनं अनिवार्यं अस्ति। रामायणं अपि अस्माभिः अनुशासनस्य ज्ञानं यच्छति।

राहुलः, 9E

# मम विद्यालयः

मम विद्यालयस्य नाम चिन्मयविद्यालयः अस्ति। अस्माकं विद्यालयः अति सुंदरः अस्ति। अत्र एकम् क्रीडाक्षेत्रम् , द्वौ पुस्तकालयौ च सन्ति। विद्यालयस्य प्राचार्यः श्रीमान् ए. के. झा अस्ति। विद्यालये प्रतिदिनं प्रातःकाले सर्वे जनाः प्रार्थनां कुर्वन्ति। विद्यालयं निकषा एकं देवालयम् अपि अस्ति। एषः बोकारोनगरे स्थितः अस्ति। विद्यालयः अति स्वच्छं वर्तते। अत्र अधिकाधिकं ज्ञानं प्राप्नोमि। मम विद्यालयः ज्ञानस्य देवालयः अस्ति।




गार्गी, 9E

# वृक्षारोपणं

वृक्षाः मानवानां जीवनाय अत्यावश्यकं सन्ति। वृक्षाणाम् बहु लाभः भवति। परं लोभीजनाः स्वस्वार्थाय वृक्षाणाम् कर्तनं कुर्वन्ति। वृक्षाः न केवलं मानवानाम् कृते परन्तु सर्वेभ्यः जीवेभ्यः अनिवार्याः। वृक्षाः पर्यावरणस्य शुद्धीकरणं कुर्वन्ति। एतदर्थं वृक्षारोपणं अपि करणीया। वृक्षारोपणं यदा जनाः मध्ये मध्ये कुर्वन्ति तदा वृक्षाणाम् वर्धनं भविष्यति। वृक्षैः धरा सुंदरा दृश्यते। वृक्षारोपणं कृते " वनमहोत्सवः " अपि मन्यते।



लाइबा, 9D

# गजः



गजः विशालकायः जन्तुः अस्ति। प्रायः तेषां वर्णः कृष्णः भवति। परन्तु श्वेतः गजः अपि दृश्यते। अयं हरितकाष्ठं, पत्रं, अन्नं च खादति। जनाः गजान् गणेशरुपं इति मन्यन्ते। एतदर्थं अस्य पूजनम् अपि भवति। गजः शौण्डेन सर्वं कठिनकार्यं करोति। गजः बृहदाकारः बलशाली च महान् जन्तुः । अस्य नेत्रे विना सर्वाणि अङ्गानि अतीव स्थूलानि । अस्य पादाः स्तम्भाः इव अतीव स्थूलाः । कर्णौ शूर्पे इव अति विशालौ । नेत्रे तु ल्घ्वाकारकौ । तथापि सः सूक्ष्माण्यपि वस्तूनि द्रष्टुं शक्नोति | युद्धेषु गजसेनायाः प्राधान्यम् आसीत् । गजानां दन्तैः विविधानि पेटिकादीनि वस्तूनि कुर्वन्ति ।

सुरभी, 8G

# होलीकोत्सवः



अस्माकं देशे अनेकाः उत्सवा : भवन्ति । तेषु होलिकोत्सव : उत्साहवर्धकः भवन्ति ।होलिकोत्सव: भारतवर्षस्य सर्वजनानानां कृते प्रिय: उत्सव:अस्ति। अयम् उत्सव: फाल्गुन शुक्ल पक्षस्य पुर्णिमायां तिथौ संघटते। अयमुत्सव: भारतवर्षस्य प्रसिद्ध: उत्सव अस्ति। एतस्योत्सवस्य सम्बन्धिनी एका कथा हिरण्यकशपोः भगिन्याः संबंधिताः। भगवत् कृपया होलिका भस्साज्जता। बालक: प्रहलाद: ईश्वरस्य प्रसादेन सुरक्षित: आसीत्। होलिकात्सवे जनाः परस्परं रंङ्गरञ्जितम जलं प्रक्षिपन्ति । जनाः उत्सवावसरे नृत्यन्ति गायन्ति च ।जना : गृह , , गृह गत्वा अविरालेपनं कुर्वन्ति स्वागतं च प्राप्नुवन्ति ।


श्वेता झा, 9D




# बालकृतयः



स्मृति कुमारी, 9E




अभिनव: कुमार: , 9D




अभिनव: कुमार: , 9D




शिवप्रिया शर्मा, 8b



शिवप्रिया शर्मा, 8b



स्मृति कुमारी, 9E





अंजली सोनी, 8D




शिवप्रिया शर्मा, 8b




अनीशः कुमारः, 8B




अभिनव: कुमार: , 9D




अंजली सोनी, 8D



# बालप्रमोदिनी

# शब्दज्ञानम्



जलम्





दधि




शीतपेयम्



काफीपेयम्



घृतम्



नारिकेलजलम्



दुग्धपेयम्



चायम्



आम्ररसम्

# संस्कृत अव्यय शब्दाः

## Indeclinabes related to days

**अद्य** – Today

**ह्यः** – Yesterday

**श्वः** – Tomorrow


**परह्यः** – Day before yesterday

**परश्वः** – Day after tomorrow

**प्रपरह्यः** – Day before the day before yesterday

**प्रपरश्वः** – Day after the day after tomorrow

# संस्कृते विज्ञानम्



## Sapthaswara

### THE 7 NOTES

Sa Ri Ga ma pa dha Ni

श्रुतिभ्यः स्युः स्वराः षड्जर्षभगान्धारमध्यमाः।
पञ्चमो धैवतश्चाथ निषाध इति सप्त ते।।
तेषां संज्ञाः स-रि-ग-म-प-ध-नि इत्यपराः मताः।।
(Sangita-ratnakara 1.3.23,24)

The seven notes drawn from the Shruti are Shadjam, Rishabam, Gandharam, Madhyamam, Panchamam, Dhaivatam and Nishadam. Their other (short) names are Sa, Ri, Ga, Ma, Pa, Dha and Ni.



## Music Instruments

वाद्यानि

चत्वारि वाद्यानि
ततञ्चैवावनद्धं च घनं सुषिरमेव च।
चतुर्विधं तु विज्ञेयमातोद्यं लक्षणान्वितम्।।
(Natyashastram 28.1.1) नाट्यशास्त्रम् -28-1
ततं तन्त्रीगतं ज्ञेयम् अनवद्धं तु पौष्करम्।
घनस्तु तालो विज्ञेयः सुषिरो वंशः एव च।।
(Natyashastram 28.1.1.2) नाट्यशास्त्रम् -28-2

There are four type of musical instruments according to their nature--Tatam, the stringed; Avanaddham, the percussion; Ghanam, the cymbal (for rhythm); and Sushiram, the hollow(flute).

Bhartiya Music- Always imitated, Never Equalled!



# चित्रावली


CHINMAYA VIDYALAYA
B. S. CITY
















BOKARO



BOKARO
Beloved







सुभाषितम्
गुणैरुत्तमतां यान्ति
नोच्चैरासनसंस्थितैः।
प्रासादशिखरस्थोऽपि
किं काको गरुडायते।।
ONE CAN BECOME GREAT ONLY THROUGH ONE'S NOBLE QUALITIES AND NOT BY THE POSITION ONE HOLDS. JUST AS A CROW CAN'T BECOME AN EAGLE BY PERCHING ITSELF ATOP A PALACE.
ओ३म् उद्यानं ते पुरुष नावयानं जीवातुं ते दक्षतातिं कृणोमि ।
आ हि रोहेमममृतं सुखं रथमथ जिविर्विदथमा वदासि।।
अथर्ववेद ८। १ । ६
नववर्षस्य हार्दा: शुभाशया:( चैत्र - शुक्ल – प्रतिपदा )











## अग्रिमा प्रति कृते अधोलिखितअणुसङ्केतस्य उपरि

## स्वरचनां प्रेषयन्तु

अणुसङ्केतम्- cvbokaro.gkrishna@gmail.com